# काञ्ची मठेश करावलम्बम्

प्रातस्स्मरामि भवदीय मुखारविन्दम्
मन्दस्मितं च जनितापहारं जनानाम् ।
संपत्करीं च भवतोद्धरकटाक्ष लक्ष्मीम्
काञ्ची मठेश मम देहि करावलम्बम् ॥ १॥

प्रातस्स्मरामि कलिदोषहराणि यानि
हृद्यानि दिव्यमधुराणि मनोहराणि ।
वाक्यानि त्वदीय वदनांबुज निर्गतानि
काञ्ची मठेश मम देहि करावलम्बम् ॥ २॥

वक्षस्थलं विमलहेमसमानवर्णम्
भस्माङ्कितं जनमनोहर कुङ्कुमाङ्कम् ।
प्रातस्स्मरामि भवतोद्धरशिरं महात्मन्
काञ्ची मठेश मम देहि करावलम्बम् ॥ 3॥

मत्तेभ तुल्यगमनं च निरीक्ष्य तेऽद्य
यात्वा वनान्तरम् अनन्त गजाश्चलीना: /
प्रातस्स्मरामि गज-राज-गतिं तवेदम्
काञ्ची मठेश मम देहि करावलम्बम् ॥ 4॥

दक्षिण दण्डम् अवलम्ब्य तदितरेण
हस्तेन चारुकलशञ्च विराजमानम् ।
रक्ताम्बरं च तवचारु कटिं स्मरामि
काञ्ची मठेश मम देहि करावलम्बम् ॥5॥

विस्मृत्य दोषमखिलञ्च क्षममाप्रदातुम्
त्रातुं च यान्य भगवन् कृत भक्तदीक्षाः ।
प्रातस्स्मरामि यतिपुङ्गव तेऽनुकम्पाम्
काञ्ची मठेश मम देहि करावलम्बम् ॥6॥

प्रातस्स्मरामि भवदीय पदारविन्दम्
यस्मात् प्रयान्ति दुरितानि महान्तितानि ।
आयान्ति तानि मुहुरद्य सुमंगलानि
काञ्ची मठेश मम देहि करावलम्बम् ॥7॥

॥ इति श्रीकाञ्चमठेशकरावलबस्तोत्रम् सम्पूर्णम् ॥

# Kāñchī-maṭheśha-karāvalambam

## Kumbhaghoṇavāstavyena lakṣmīkāntaśarmaṇā viracitam

prātassmarāmi bhavadīya mukhāravindam manda-
smitaṃ cha janitāpaharaṃ janānām । saṃpat-karīṃ cha
bhavato'dhara-kaṭākṣha-lakṣhmīṃ kāñchī-maṭheśha
mama dehi karāvalambam ॥1॥

prātassmarāmi kali-doṣha-harāṇi yāni hṛdyāni
divya-madhurāṇi manoharāṇi । vākyāni tvadeya
vadanāṃbuja-nirgatāni kāñchī-maṭheśha mama
dehi karāvalambam ॥2॥

vakṣhaḥ-sthalaṃ vimala-hema-samāna-varṇaṃ
bhasmāṅkitaṃ jana-manohara-kumkumāngam ।
prātassmarāmi bhavato'dhara-shiram mahātman
kāñchī-maṭheśha mama dehi karāvalambam ॥
3॥

mattebha-tulya-gamanaṃ cha nirīkṣhya te'dya
yātvā vanāntaram ananta gajāśhchalīnāḥ।

prātassmarāmi gaja-rāja-gatiṃ tavedam kāñchī-
maṭheśha mama dehi karāvalambam ॥4॥

dakṣheṇa daṇḍam avalambya taditareṇa hastena
chāru-kalaśhascha virājamānam । raktāmbarāṃ
cha tava chāru-kaṭiṃ smarāmi kāñchī-maṭheśha
mama dehi karāvalambam ॥5॥ vismṛtya doṣham
akhilañcha shamamāprādhatum trātuṃ cha yā'tya
bhagavan kṛta -bhaktha-dīkṣhāha ।
prātassmarāmi yati-puṅgava te'nukampāṃ
kāñchī-maṭheśha mama dehi karāvalambam ॥6॥

prātassmarāmi bhavadīya-padāravindam yasmāt
prayānti duritāni mahānti tāni । āyānti tāni
muhuradya su-maṅgalāni kāñchī-maṭheśha
mama dehi karāvalambam ॥ 7॥